श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ उदकशान्ति मन्त्राः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ उदकशान्ति मन्त्राः ॥

अ॒स्म॒द्गु॒रु॒भ्यो॒ न॒म॒ः हरिः ओम्।

अ॒ग्निमी᳚ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज᳚म्। होता᳚रं रत्न॒धात॑मम्॥ हरि॑ः ओम्॥

हरिः ओम्॥ इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑स्थो पा॒यव॑स्थ दे॒वो व॑स्सवि॒ता प्रार्प॑यतु॒ श्रेष्ठ॑तमाय॒ कर्म॑ण॒ आप्या॑यध्वमघ्निया देवभा॒गमूर्ज॑स्वतीः॒ पय॑स्वतीः प्र॒जाव॑तीरनमी॒वा अ॑य॒क्ष्मामाव॑स्ते॒न ई॑शत॒ माऽघश॑ग्ं॒सो रु॒द्रस्य॑ हे॒तिः परि॑वो वृणक्तु॒ ध्रु॒वा अ॒स्मिन्गोप॑तौ स्यात ब॒ह्वीर्यज॑मानस्य प॒शून्पा॑हि॥ हरि॑ः ओम्॥

हरिः ओम्॥ अग्न॒ आया॑हि वी॒तये॑ गृणा॒नो ह॒व्यदा॑तये। निहोता॑ सथ्सि ब॒र्॒हिषि॑॥ हरि॑ः ओं॥

हरिः ओं॥ शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑। शं योर॒भिस्र॑वन्तु नः॥

कृ॒णु॒ष्वपाज॒ः प्रसि॑तिं॒ न पृ॒थ्वीं या॒हि राजे॒ वाम॑वा॒ग्ं॒ इभे॑न। तृ॒ष्वीमनु॒ प्रसि॑तिं द्रूणा॒नोऽस्ता॑ऽसि॒ विध्य॑ र॒क्षस॒स्तपि॑ष्ठैः। तव॑ भ्र॒मास॑ आशु॒या पत॑न्त्यनु॑ स्पृश धृष॒ता शोशु॑चानः। तपूग्ं॑ष्यग्ने जु॒ह्वा॑ पत॒ङ्गानसं॑न्दितो॒ विसृ॑ज॒ विष्व॑गु॒ल्काः। प्रति॒ स्पशो॒ विसृ॑ज॒ तूर्णि॑तमो॒ भवा॑ पा॒युर्वि॒शो

www.prapatti.com

अस्या अदब्धः। यो नो दूरे अघशग्ंसो यो अन्त्यग्ने माकिष्टे व्यथिरादधर्षीत्। उदग्ने तिष्ठ प्रत्याऽऽतनुष्वन्यमित्राग्ं ओषतात् तिग्महेते। यो नो अरातिग्ं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्। ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्। स ते जानाति सुमतिं यं विष्ठ य ईवते ब्रह्मणे गातुमैरत्। विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत्। सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः। पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः। अर्चामि ते सुमतिं घोष्यर्वाख्सन्ते वावाता जरतामियङ्गीः। स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्। इह त्वा भूर्याचरेदुपत्मन्दोषावस्तर्दीदिवाग्ंसमनु द्यून्। क्रीडन्तस्त्वा सुमनसस्सपेमाभि द्युम्ना तस्थिवाग्ंसो जनानाम्। यस्त्वा स्वश्वस्सुहिरण्यो अग्न उपयाति वसुमता रथेन। तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत्। महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय। त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः। अस्वप्नजस्तरणयस्सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः। ते पायवस्सध्रियञ्चो निषद्याग्ने तव नः पान्त्वमूर। ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्। ररक्ष तान्थ्सुकृतो विश्ववेदा दिफ्सन्त इद्रिपवो नाह देभुः। त्वया वयग्ं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्। उभा शग्ंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण। अया ते अग्ने समिधा विधेम प्रति

www.prapatti.com

स्तोमगं शस्यमानं गृभाय। दहाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्। रक्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म। शिशानो अग्निः क्रतुभिस्समिद्धस्स नो दिवा स रिषः पातु नक्तम्। विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा। प्रादेवीर्मायास्सहते दुरेवाश्शिशीते शृङ्गे रक्षसे विनिक्षे। उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ॥

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः। अस्माकमस्तु केवलः। इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः। शूरो नृषाता शवसश्चकान आगोमति व्रजे भजा त्वं नः। इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु। इन्द्र तानि त आ वृणे। अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये। अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये। आयस्मिन्थ्सप्तवासवास्तिष्ठन्ति स्वारुहो यथा। ऋषिर् ह दीर्घश्रुत्तम इन्द्रस्य घर्मो अतिथिः। आमासु पक्वमैरय आसूर्यगं रोहयो दिवि। घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः। इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः। इन्द्रं वाणीरनूषत। गायन्ति त्वा गायत्रिणोर्चन्त्यर्कमर्किणः। ब्रह्माणस्त्वा शतक्रतवुद्वगं शमिव येमिरे। अगंहोमुचे प्रभरेमा मनीषामोषिष्ठदाव्ने सुमतिं गृणानाः। इदमिन्द्र प्रति हव्यं गृभाय सत्यास्सन्तु यजमानस्य कामाः। विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः। अगंहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते। प्रसम्राजं प्रथममध्वराणामगंहोमुचं वृषभं यज्ञियानाम्।

अपां नपातमश्विना हयन्तमस्मिन्नर इन्द्रियं धत्तमोजः। विन इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माग्ं अभिदासति। इन्द्र क्षत्रमभि वाममोजोजायथा वृषभ चर्षणीनाम्। अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम्। मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगामा परस्याः। सृकग्ं सग्ंशाय पविमिन्द्र तिग्मं विशत्रून्ताढि विमृधो नुदस्व। विशत्रून् विमृधो नुद विवृत्रस्य हनूरुज। विमन्युमिन्द्र भामितोऽमित्रस्याभिदासतः। त्रातारमिन्द्रमवितारमिन्द्रग्ं हवेहवे सुहवग्ं शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रग्ग्ं स्वस्तिनो मघवा धात्विन्द्रः। मा ते अस्याग्ं सहसावन्परिष्टावघाय भूम हरिवः परादै। त्रायस्वनोऽवृकेभिर्वरूथैस्तव प्रियासस्सूरिषु स्याम। अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्। ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्त वा उ। वृष्णे यत्ते वृषणो अर्कमर्चानिन्द्र ग्रावाणो अदितिस्सजोषाः। अनश्वासो ये पवयोऽरथा इन्द्रेषिता अभ्यवर्तन्त दस्यून्॥

यत इन्द्र भयामहे ततो नो अभयं कृधि। मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि॥ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी। वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयङ्करः॥

महाग्ं इन्द्रो वज्रबाहुष्षोडशी शर्म यच्छतु॥ स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि॥ सजोषा इन्द्र सगणो मरुद्भिस्सोमं

www.prapatti.com

पिब वृत्रहञ्छूर विद्वान्। जहि शत्रूंरप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥

ये देवाः पुरस्सदोग्निनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा ये देवा दक्षिणसदो यमनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा ये देवाः पश्चात्सदस्सवितृनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा ये देवा उत्तरसदो वरुणनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यस्स्वाहा ये देवा उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्तेनः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यस्स्वाहाऽग्नये रक्षोघ्ने स्वाहा यमाय रक्षोघ्ने स्वाहा सवित्रे रक्षोघ्ने स्वाहा वरुणाय रक्षोघ्ने स्वाहा बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा॥

अग्निरायुष्मान्थ्सवनस्पतिभिरायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि सोम आयुष्मान्थ्स ओषधीभिरायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि यज्ञ आयुष्मान्थ्सदक्षिणाभिरायुष्मान्तेन त्वाऽऽयुषाऽऽयुष्मन्तं करोमि ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽयुषाऽयुष्मन्तं करोमि देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽऽयुषाऽयुष्मन्तं करोमि॥

या वामिन्द्रावरुणा यतव्या तनूस्तयेममगंहसो मुञ्चतं या वामिन्द्रावरुणा सहस्या तनूस्तयेममगंहसो मुञ्चतं या वामिन्द्रावरुणा रक्षस्या तनूस्तयेममगंहसो मुञ्चतं या वामिन्द्रावरुणा तेजस्या तनूस्तयेममगंहसो मुञ्चतं यो वामिन्द्रावरुणावग्नौ स्रामस्तं

वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा द्विपाथ्सु॒ प॒शुषु॒ स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा॒ चतुंष्पाथ्सु॒ स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा गो॒ष्ठे स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा गृहेषु॒ स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा॒प्सु॒ स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरु॒णौषंधीषु॒ स्रामस्तं वांमे॒तेनावं यजे॒ यो वांमिन्द्रावरुणा॒ वन॒स्पतिंषु॒ स्रामस्तं वांमे॒तेनावं यजे॥

अग्ने यशस्वि॒न् यशंसे॒ ममंर्पयेन्द्रांवती॒मपंचितीमि॒हावंह। अ॒यं मू॒र्धा पंरमे॒ष्ठी सु॒वर्चाँस्समा॒नानांमु॒त्तमश्लोंको अस्तु॒। भ॒द्रं पश्यंन्त॒ उपंसेदु॒रग्रे॒ तपों दी॒क्षामृषंयस्सु॒व॒र्विदंः। ततंः क्ष॒त्रं बल॒मोजंश्च जा॒तं तद॒स्मै दे॒वा अ॒भि सं नंमन्तु। धा॒ता विंधा॒ता पं॒रमोत सं॒दृक् प्र॒जापंतिः परमे॒ष्ठी वि॒राजाँ। स्तोमा॒श्छंदांग्ंसि नि॒विदों म आहु॒रे॒तस्मैं रा॒ष्ट्रम॒भि सन्नंमाम॥ अ॒भ्यावंर्तध्व॒मु॒प॒मेत॒ सा॒कम॒यगं शा॒स्ताऽधिंपतिर्वो अस्तु॥ अ॒स्य वि॒ज्ञान॒मनु॒ सग्ंरंभध्वमि॒मं प॒श्चादनुं जीवाथ॒ सर्वे॥

ऋ॒ता॒षाडृतधांमा॒ग्निर्गन्ध॒र्वस्स इ॒दं ब्रह्मं क्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॒ तस्यौषंधयोप्स॒रस॒ ऊर्जो॒ नाम॒ ता इ॒दं ब्रह्मंक्ष॒त्रं पाँन्तु॒ ताभ्य॒स्स्वाहां सग्ंहि॒तो वि॒श्वसांमा॒ सूर्यो गन्ध॒र्वस्स इ॒दं ब्रह्मंक्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॒ तस्य॒ मरींचयोऽप्स॒रसं आ॒यु॒वो॒ नाम॒ ता इ॒दं ब्रह्मंक्ष॒त्रं पाँन्तु॒ ताभ्य॒स्स्वाहां सु॒षु॒म्नस्सू॒र्यरंश्मिश्च॒न्द्रमां गन्ध॒र्वस्स इ॒दं ब्रह्मंक्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॒ तस्य॒ नक्षंत्राण्यप्स॒रसों बे॒कु॒रंयो॒ नाम॒ ता इ॒दं ब्रह्मंक्ष॒त्रं पाँन्तु॒ ताभ्य॒स्स्वाहां भु॒ज्यु॒स्सुं॒प॒र्णो य॒ज्ञो गंन्ध॒र्वस्स इ॒दं ब्रह्मंक्ष॒त्रं पांतु॒ तस्मै॒ स्वाहा॒ तस्य॒ दक्षिंणा अप्स॒रसंस्त॒वा नाम॒ ता इ॒दं ब्रह्मंक्ष॒त्रं पाँन्तु॒

ताभ्य॒स्स्वाहा᳚ प्र॒जाप॑तिर्वि॒श्वक॑र्मा॒ मनो॑ गन्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्य॑र्क्सा॒मान्य॑प्स॒रसो॒ वह्न॑यो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहे॑षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्यापो॑ऽप्स॒रसो॑ मु॒दा नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहा॒ भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑। स नो॑ रा॒स्वाज्या॑निग्ं रा॒यस्पोष॑ग्ं सु॒वीर्य॑ग्ं संवथ्स॒रीणा॑ग्ं स्व॒स्तिग्ग्॒ स्वाहा॑ पर॒मे॒ष्ठ्यधि॑पतिर्मृ॒त्युर्ग॑न्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्य॒ विश्व॑मप्स॒रसो॒ भुवो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहा॑ सुक्षि॒तिस्सु॒भू॑तिर्भद्र॒कृत्सुव॑र्वान्प॒र्जन्यो॑ गन्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्य॑ वि॒द्युतो॑ऽप्स॒रसो॒ रुचो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहा॑ दू॒रेहे॑तिरमृड॒यो मृ॒त्युर्ग॑न्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्य॑ प्र॒जा अ॑प्स॒रसो॑ भी॒रुवो॒ नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहा॒ चारु॑ः कृपणका॒शी कामो॑ गन्ध॒र्वस्स इ॒दं ब्रह्म॑क्ष॒त्रं पा॑तु॒ तस्मै॒ स्वाहा॒ तस्या॒धयो॑ऽप्स॒रस॑श्शो॒चय॑न्ती॒र्नाम॒ ता इ॒दं ब्रह्म॑क्ष॒त्रं पा᳚न्तु॒ ताभ्य॒स्स्वाहा॒ स नो॑ भुव॑नस्य पते॒ यस्य॑ त उ॒परि॑ गृ॒हा इ॒ह च॑। उ॒रु ब्रह्म॑णे॒ऽस्मै क्ष॒त्राय॒ महि॒ शर्म॑ यच्छ॒ स्वाहा᳚॥

नमो॑ अस्तु स॒र्पेभ्यो॒ ये के च॑ पृथि॒वीमनु॑। ये अ॒न्तरि॑क्षे॒ ये दि॒वि तेभ्य॑स्स॒र्पेभ्यो॒ नम॑ः। ये॑ऽदो रो॑च॒ने दि॒वो ये वा॒ सूर्य॑स्य र॒श्मिषु॑। येषा॑म॒प्सु सद॑ः कृ॒तं तेभ्य॑स्स॒र्पेभ्यो॒ नम॑ः। या इष॑वो यातु॒धाना॑नां॒ ये वा॒ वन॒स्पती॒ग्ं॒रनु॑। ये वा॑ऽव॒टेषु॒ शेर॑ते॒ तेभ्य॑स्स॒र्पेभ्यो॒ नम॑ः॥

अ॒यं पु॒रो हरि॑केश॒स्सूर्य॑रश्मि॒स्तस्य॑ रथगृ॒त्सश्च॒ रथौ॑जाश्च सेनानिग्राम॒ण्यौ॑ पु॒ञ्जिकस्थ॒ला च॑ कृतस्थ॒ला चा᳚प्स॒रसौ॑ यातु॒धाना॑ हे॒ती रक्षाग्ं॑सि॒ प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधाम्य॒यं द॑क्षि॒णा वि॒श्वक॑र्मा॒ तस्य॑ रथस्व॒नश्च॒ रथे॑ चित्रश्च सेनानिग्राम॒ण्यौ॑ मेन॒का च॑ सहज॒न्या चा᳚प्स॒रसौ॑ द॒ङ्क्ष्णवः॑ प॒शवो॑ हे॒तिः पौरु॑षेयो व॒धः प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधाम्य॒यं प॒श्चाद्वि॒श्वव्य॑चा॒स्तस्य॒ रथ॑प्रोत॒श्चास॑मरथश्च सेनानिग्राम॒ण्यौ᳚ प्र॒म्लोच॑न्ती चानु॒म्लोच॑न्ती चाप्स॒रसौ॑ स॒र्पा हे॒तिर्व्या॒घ्राः प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधाम्य॒यमु॑त्त॒रात्सं॒यद्व॑सु॒स्तस्य॑ सेन॒जिच्च॑ सु॒षेण॑श्च सेनानिग्राम॒ण्यौ॑ वि॒श्वाची॑ च घृ॒ताची॑ चाप्स॒रसा॒वापो॑ हे॒तिर्वात॒ः प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधाम्य॒यमु॒पर्य॒र्वाग्व॑सु॒स्तस्य॒ तार्क्ष्य॒श्चारि॑ष्टनेमिश्च सेनानिग्राम॒ण्यौ॑वु॒र्वशी॑ च पू॒र्वचि॑त्तिश्चाप्स॒रसौ॑ वि॒द्युद्धे॒तिर॑व॒स्फूर्ज॒न् प्रहे॑ति॒स्तेभ्यो॒ नम॒स्ते नो॑ मृडयन्तु॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधामि॥

आ॒शुश्शिशा॑नो वृष॒भो न यु॒ध्मो घ॑नाघ॒नः क्षोभ॑णश्चर्षणी॒नाम्। सं॒क्रन्द॑नोऽनिमि॒ष ए॑कवी॒रश्श॒तग्ं सेना॑ अजयथ्सा॒कमिन्द्रः॑। सं॒क्रन्द॑नेना निमि॒षेण॑ जि॒ष्णुना॑ युत्का॒रेण॑ दुश्च्यव॒नेन॑ धृ॒ष्णुना᳚। तदिन्द्रे॑ण जयत॒ तथ्स॑हध्वं॒ युधो॑ नर॒ इषु॑हस्तेन॒ वृष्णा᳚। स

www.prapatti.com

इषुहस्तैस्स निषङ्गिभिर्वशी सग्ग्स्रष्टा स युध इन्द्रो गणेन। सग्ंसृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता। बृहस्पते परिदीया रथेन रक्षोहाऽमित्राग्ं अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्। गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्मप्रमृणन्तमोजसा। इमग्ं सजाता अनुवीरयध्वमिन्द्रग्ं सखायोऽनु सग्ं रभध्वम्। बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्। अभि गोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योऽस्माकग्ं सेना अवतु प्र युत्सु। इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे। इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्। अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु। उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां महाग्ंसि। उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः। उप प्रेत जयता नरस्स्थिरा वस्सन्तु बाहवः। इन्द्रो वश्शर्म यच्छत्वनाधृष्या यथाऽसथ। अवसृष्टा परा पत शरव्ये ब्रह्मसग्ंशिता। गच्छामित्रान्प्रविश मैषां कञ्चनोच्छिषः। मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजामृतेनाभिवस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः। यत्र

बाणास्सम्पतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे॥

ममाँग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तनुवं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाऽध्यक्षेण पृतना जयेम। मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः। ममान्तरिक्षमुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन्। मयि देवा द्रविणमायजन्तां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारा वनिषन्त पूर्वेऽरिष्टास्स्याम तनुवा सुवीराः। मह्यं यजन्तु मम यानि हव्याकूतिस्सत्या मनसो मे अस्तु। एनो मा निगां कतमच्चनाहं विश्वे देवासो अधि वोचता मे। देवीष्षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वम्। माहास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन्। अग्निर्मन्युं प्रतिनुदन् पुरस्तादब्धो गोपाः परिपाहि नस्त्वम्। प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा विनेशत्। धाता धातृणां भुवनस्य यस्पतिर्देवं सवितारमभिमातिषाहम्। इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात्। उरुव्यचा नो

महिषश्शर्म यगंसदस्मिन् हवे पुरुहूतः पुरुक्षु। सनः प्रजायै हर्यश्व मृडयेन्द्र मा नो रीरिषो मा परादाः। येनस्सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्। वसवो रुद्रा आदित्या उपरि स्पृशं मोग्रं चेत्तारमधिराजमक्रन्। अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः। इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवस्समिन्धते॥ विश्वस्यां विशि प्रविविशिवागं समीमहे स नो मुञ्चत्वगंहसः। यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम्। स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वगंहसः। इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नस्स्तोमा उप मामुपागुः। यो दाशुषस्सुकृतो हवमुप गन्ता स नो मुञ्चत्वगंहसः। यस्संग्रामं नयति सं वशी युधे यः पुष्टानि सगंसृजति त्रयाणि। स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वगंहसः। मन्वे वां मित्रावरुणा तस्य वित्तगं सत्यौजसा दृगंहणा यं नुदेथै। या राजानगं सरथं याथ उग्रा ता नो मुञ्चतमागसः। यो वागं रथं ऋजुरश्मिस्सत्यधर्मा मिथुश्चरन्तमुपयाति दूषयन्। स्तौमि मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः। वायोस्सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः। यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चतमागसः। उपश्रेष्ठान आशिषो देवयोर्धर्मे अस्थिरन्। स्तौमि वायुगं सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः। रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ

सु॒यमे॑भि॒रश्वैः॑। ययो॒र्वां दे॑वौ दे॒वेष्वनि॑शित॒मोज॒स्तौ नो॑ मुञ्चत॒माग॑सः। यदया॑तं वह॒तुग्ं सू॒र्याया॑स्त्रिच॒क्रेण॑ स॒ग्ं॒सद॑मि॒च्छमा॑नौ। स्तौमि॑ दे॒वाव॒श्विनौ॑ नाथि॒तो जो॑हवीमि॒ तौ नो॑ मुञ्चत॒माग॑सः। म॒रुतां॑ मन्वे॒ अधि॑ नो ब्रुवन्तु॒ प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे॑। आ॒शून् हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑ मुञ्च॒न्त्वेन॑सः। ति॒ग्ममायु॑धं वी॒डि॒तग्ं सह॑स्वद्दि॒व्यग्ं शर्धः॒ पृत॑नासु॒ जि॒ष्णु। स्तौमि॑ दे॒वान्म॒रुतो॑ नाथि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः। दे॒वानां॑ मन्वे॒ अधि॑ नो ब्रुवन्तु॒ प्रेमां वाचं॒ विश्वा॑मवन्तु॒ विश्वे॑। आ॒शून् हु॑वे सु॒यमा॑नू॒तये॒ ते नो॑ मुञ्च॒न्त्वेन॑सः। यदि॒दं मा॑ऽभि॒शोच॑ति॒ पौरु॑षेयेण॒ दैव्ये॑न। स्तौमि॒ विश्वा॑न्दे॒वान्नाथि॒तो जो॑हवीमि॒ ते नो॑ मुञ्च॒न्त्वेन॑सः। अनु॑नो॒ऽद्यानु॑मतिर्य॒ज्ञं दे॒वेषु॑ मन्यताम्। अ॒ग्निश्च॑ हव्य॒वाह॑नो॒ भव॑तां दा॒शुषे॒ मयः॑। अन्विद॑नुमते॒ त्वं मन्या॑सै॒ शं च॑नः कृधि। क्रत्वे॒ दक्षा॑य नो हिनु॒ प्रण॒ आयूग्ं॑षि तारिषः। वै॒श्वा॒न॒रो न॑ ऊ॒त्याप्रया॑तु परा॒वतः॑। अ॒ग्निरु॒क्थेन॒ वाह॑सा। पृ॒ष्टो दि॒वि पृ॒ष्टो अ॒ग्निः पृ॑थि॒व्यां पृ॒ष्टो विश्वा॒ ओष॑धी॒रावि॑वेश। वै॒श्वा॒न॒रस्सह॑सा पृ॒ष्टो अ॒ग्निस्सनो॒ दिवा॒ सरि॒षः पा॑तु॒ नक्त॑म्। ये अप्र॑थेता॒ममि॑तेभि॒रोजो॑भि॒र्ये प्र॑ति॒ष्ठे अभ॑वतां॒ वसू॑नाम्। स्तौमि॒ द्यावा॑पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मग्ं॒ह॑सः। उर्वी रोदसी॒ वरि॑वः कृणोतं॒ क्षेत्र॑स्य पत्नी॒ अधि॑नो ब्रूयातम्। स्तौमि॒ द्यावा॑पृथि॒वी ना॑थि॒तो जो॑हवीमि॒ ते नो॑ मुञ्चत॒मग्ं॒ह॑सः। यत्ते॑ व॒यं पु॑रुष॒त्राय॑ विष्ठावि॑द्वाग्ंसश्चकृ॒मा कच्च॒नाऽऽग॑ः। कृ॒धी स्व॑स्माग्ं अदि॑ते॒रना॑गा॒ व्येनाग्ं॑सि शिश्रथो॒ विष्व॑गग्ने। यथा॑ह॒ तद्व॑सवो

गौ॒र्यं॑ चित्प॒दि॒षि॒ताम॑मु॑ञ्चता यजत्राः। ए॒वा त्वम॒स्मत्प्रमु॑ञ्चा॒व्य॑ग्ंह॒ः प्राता॒॑र्यग्ने प्रत॒रां न॒ आयु॑ः॥

स॒मीची॒ नामा॑सि॒ प्राची॒ दिक्तस्या॑स्ते॒ऽग्निरधि॑पतिरसि॒तो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधाम्योज॒स्विनी॒ नामा॑सि दक्षि॒णा दिक्तस्या॑स्त॒ इन्द्रोधि॑पति॒ः पृदा॑कू रक्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधामि॒ प्राची॒ नामा॑सि प्र॒तीची॒ दिक्तस्या॑स्ते॒ सोमोऽधि॑पतिस्स्व॒जो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधाम्यव॒स्थावा॒ नामा॒स्यु॒दी॑ची॒ दिक्तस्या॑स्ते॒ वरु॒णोऽधि॑पतिस्ति॒रश्च॑ राजी रक्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधाम्यधि॑पत्नी॒ नामा॑सि बृह॒ती दिक्तस्या॑स्ते॒ बृह॒स्पति॒रधि॑पतिश्श्वि॒त्रो र॑क्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधामि व॒शिनी॒ नामा॑सी॒यं दिक्तस्या॑स्ते य॒मोऽधि॑पतिः क॒ल्माष॑ग्रीवो रक्षि॒ता यश्चाधि॑पति॒र्यश्च॑ गो॒प्ता ताभ्यां॒ नम॒स्तौ नो॑ मृडयतां॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वां॒ जंभे॑ दधामि॥

हे॒तयो॒ नाम॑ स्थ॒ तेषां॑ वः पु॒रो गृ॒हा अ॒ग्निर्व॒ इष॑वस्सलि॒लो वा॑तना॒मं तेभ्यो॑ वो॒ नम॒स्तेनो॑ मृडयत॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं वो॒ जंभे॑ दधामि निलि॒म्पा नाम॑ स्थ॒ तेषां॑ वो दक्षि॒णा गृ॒हाः पि॒तरो॑ व॒ इष॑व॒स्सग॑रो वातना॒मं तेभ्यो॑ वो॒ नम॒स्तेनो॑ मृडयत॒ ते यं द्वि॒ष्मो यश्च॑ नो॒ द्वेष्टि॒ तं

वो जंभे दधामि वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहास्स्वप्नो व इषवो गह्वरो वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्यवस्थावानो नाम स्थ तेषां व उत्तरद्गृहा आपो व इषवस्समुद्रो वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्यधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान् वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि॥

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे। शतं यो नश्शरदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा। ये चत्वारः पथयो देवयाना अंतरा द्यावापृथिवी वियन्ति। तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः परिदत्तेह सर्वे। ग्रीष्मो हेमन्त उत नो वसन्तश्शरद्वर्षास्सुवितन्नो अस्तु। तेषामृतूनाग्ं शतशारदानां निवात एषामभये स्याम। इदुवथ्सराय परिवथ्सराय संवथ्सराय कृणुता बृहन्नमः। तेषां वयग्ं सुमतौ यज्ञियानां ज्योगजीता अहतास्स्याम। भद्रान्नश्श्रेयस्समनैष्ट देवास्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितो आविशस्व शं तोकाय तनुवे स्योनः॥

भूतं भव्यं भविष्यद्वषट्त्स्वाहा नम ऋक्साम यजुर्वषट्त्स्वाहा नमो गायत्री त्रिष्टुप्जगती वषट्त्स्वाहा नमः पृथिव्यन्तरिक्षं

द्यौर्वष॒ट्त्स्वाहा॒ नमो॒ऽग्निर्वा॒युस्सूर्यो॒ वष॒ट्त्स्वाहा॒ नम॑ः प्रा॒णो व्या॒नो॑ऽपा॒नो वष॒ट्त्स्वाहा॒ नमो॑ऽन्नं॑ कृ॒षिर्वृष्टि॒र्वष॒ट्त्स्वाहा॒ नम॑ः पि॒ता पु॒त्रः पौत्रो॒ वष॒ट्त्स्वाहा॒ नमो॒ भूर्भु॒व॒स्सु॒व॒र्वष॒ट्त्स्वाहा॒ नम॑ः ॥

इन्द्रो॑ दधी॒चो अ॒स्थभि॑ः। वृ॒त्राण्यप्र॑तिष्कुतः। ज॒घान॑ नव॒तीर्नव॑। इ॒च्छन्नश्व॑स्य॒ यच्छिर॑ः। पर्व॑ते॒ष्वप॑श्रितम्। तद्वि॑दच्छर्य॒णाव॑ति। अत्राह॒ गोर॑मन्वत। नाम॒ त्वष्टु॑रपी॒च्य॑म्। इ॒त्था च॒न्द्रम॑सो गृ॒हे। इन्द्र॒मिद्गा॒थिनो॑ बृ॒हत्। इन्द्र॑म॒र्केभि॑र॒र्किण॑ः। इन्द्रं॒ वाणी॑रनूषत। इन्द्र॒ इद्धर्यो॒स्सचा॑। संमि॑श्ल॒ आव॑चो॒ यु॒जा॑। इन्द्रो॑ व॒ज्री हि॑र॒ण्यय॑ः। इन्द्रो॑ दी॒र्घाय॒ चक्ष॑से। आ सूर्य॑ग्ं रोहयद्दि॒वि। वि गोभि॒रद्रि॑मैरयत्। इन्द्र॒ वाजे॑षु नो अव। स॒हस्र॑ प्रधनेषु च। उ॒ग्र उ॒ग्राभि॑रू॒तिभि॑ः। तमिन्द्रं॑ वाजयामसि। म॒हे वृ॒त्राय॒ हन्त॑वे। स वृषा॑ वृष॒भो भु॑वत्। इन्द्र॒स्स दाम॑ने कृ॒तः। ओजि॑ष्ठ॒स्स बले॑ हि॒तः। द्यु॒म्नी श्लो॒की स सौ॒म्य॑ः। गि॒रा वज्रो॒ न संभृ॑तः। सब॑लो॒ अन॑पच्युतः। व॒व॒क्षु॒रु॒ग्रो अस्तृ॑तः ॥

चक्षु॑षो हेते॒ मन॑सो हेते। वाचो॑ हेते॒ ब्रह्म॑णो हेते। यो मा॑घा॒यु॑रभि॒दास॑ति। तम॑ग्ने मे॒न्या मे॒निं कृ॑णु। यो मा॒ चक्षु॑षा॒ यो मन॑सा। यो वा॒चा ब्रह्म॑णाघा॒यु॑रभि॒दास॑ति। तया॑ऽग्ने॒ त्वं मे॒न्या। अ॒मुम॑मे॒निं कृ॑णु। यत्किञ्चा॒सौ मन॑सा॒ यच्च॑ वा॒चा। य॒ज्ञैर्जु॒होति॒ यजु॑षा ह॒विर्भि॑ः। तन्मृ॒त्युर्निर्ऋ॑त्या संविदा॒नः। पु॒रादि॒ष्टादाहु॑तीरस्य हन्तु। या॒तु॒धाना॒ निर्ऋ॑ति॒रादु॒रक्ष॑ः। ते अ॑स्यघ्नं॒त्वनृ॑तेन स॒त्यम्। इन्द्रे॑षिता॒ आज्य॑मस्य मथ्नन्तु। मा तत्सम॑द्धि यद॒सौ क॒रोति॑। हन्मि॑ ते॒ऽहं कृ॒तग्ं ह॒विः।

यो मे घोरमचीकृतः। अपौ चौत उभौ बाहू। अपनह्याम्यास्यम्। अप नह्यामि ते बाहु। अपनह्याम्यास्यम्। अग्नेर्देवस्य ब्रह्मणा। सर्वं तेऽवधिषं कृतम्। पुरामुष्य वषट्कारात्। यज्ञं देवेषु नस्कृधि। स्विष्टमस्माकं भूयात्। मास्मान्प्रापन्नरातयः। अन्तिदूरे सतो अग्ने। भ्रातृव्यस्याभिदासतः। वषट्कारेण वज्रेण। कृत्यागंहन्मि कृतामहम्। यो मा नक्तं दिवा सायम्। प्रातश्चाह्नो निपीयति। अद्यातमिन्द्र वज्रेण। भ्रातृव्यं पादयामसि॥

प्राणो रक्षति विश्वमेजत्। इर्यो भूत्वा बहुधा बहूनि। स इत्सर्वं व्यानशे। यो देवो देवेषु विभूरन्तः। आवृद्दूदात्क्षेत्रियध्वगद्वृषा। तमित्प्राणं मनसोपशिक्षत। अग्रं देवानामिदमत्तु नो हविः। मनसश्चित्तेदम्। भूतं भव्यं च गुप्यते। तद्धि देवेष्वग्रियम्। आ न एतु पुरश्चरम्। सह देवैरिमग्ं हवम्। मनश्श्रेयसि श्रेयसि। कर्मन् यज्ञपतिं दधत्। जुषतां मे वागिदग्ं हविः। विराड् देवी पुरोहिता। हव्यवाडनपायिनी। यया रूपाणि बहुधा वदन्ति। पेशाग्ंसि देवाः परमे जनित्रे। सा नो विराडनपस्फुरन्ती। वाग्देवी जुषतामिदग्ं हविः। चक्षुर्देवानां ज्योतिरमृते न्यक्तम्। अस्य विज्ञानाय बहुधा निधीयते। तस्य सुम्नमशीमहि। मा नो हासीद्विचक्षणम्। आयुरिन्नः प्रतीर्यताम्। अनन्धाश्चक्षुषा वयम्। जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्। श्रोत्रेण भद्रमुत शृण्वन्ति सत्यम्। श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूयते। श्रोत्रेण सर्वा दिश आ शृणोमि। येन प्राच्या



www.prapatti.com

उ॒त द॑क्षि॒णा। प्र॒तीच्यै॑ दि॒शश्शृ॒ण्वन्त्यु॑त्त॒रात्। तदिच्छ्रोत्रं॑ बहु॒धोद्यमा॑नम्। अ॒रान्न ने॒मिः परि॒ सर्वं॑ बभूव॥

सि॒ग्ं॒हे व्या॒घ्र उ॒त या पृदा॑कौ। त्विषि॑र॒ग्नौ ब्रा॑ह्म॒णे सूर्ये॒या। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना। या रा॑ज॒न्ये॑ दु॒न्दु॒भावाय॑तायाम्। अश्व॑स्य॒ क्रन्द्ये॒ पुरु॑षस्य मा॒यौ। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना। या ह॒स्तिनि॑ द्वी॒पिनि॒ या हिर॑ण्ये। त्विषि॒रश्वे॑षु॒ पुरु॑षेषु॒ गोषु॑। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना। रथे॑ अ॒क्षेषु॑ वृष॒भस्य॒ वाजे॑। वाते॑ प॒र्जन्ये॒ वरु॑णस्य॒ शुष्मे॑। इन्द्रं॒ या दे॒वी सु॒भगा॑ ज॒जान॑। सा न॒ आग॒न्वर्च॑सा संविदा॒ना। राड॑सि वि॒राड॑सि। स॒म्राड॑सि स्व॒राड॑सि। इन्द्रा॑य त्वा॒ तेज॑स्वते॒ तेज॑स्वन्तग्ग्॒ श्रीणामि। इन्द्रा॑य॒त्वौज॑स्वत॒ ओज॑स्वन्तग्ग्॒ श्रीणामि। इन्द्रा॑य त्वा॒ पय॑स्वते॒ पय॑स्वन्तग्ग्॒ श्रीणामि। इन्द्रा॑य॒ त्वाऽयु॑ष्मत॒ आयु॑ष्मन्तग्ग्॒ श्रीणामि। तेजो॑सि। तत्ते॒ प्रय॑च्छामि। तेज॑स्वदस्तु॒ मे॒ मुख॑म्। तेज॑स्व॒च्छिरो॑ अस्तु॒ मे। तेज॑स्वान् वि॒श्वत॑ः प्र॒त्यङ्। तेज॑सा॒ संपि॑पृग्धिमा। ओजो॑सि। तत्ते॒ प्रय॑च्छामि। ओज॑स्वदस्तु॒ मे॒ मुख॑म्। ओज॑स्व॒च्छिरो॑ अस्तु॒ मे। ओज॑स्वान् वि॒श्वत॑ः प्र॒त्यङ्। ओज॑सा॒ संपि॑पृग्धिमा। पयो॑सि। तत्ते॒ प्रय॑च्छामि। पय॑स्वदस्तु॒ मे॒ मुख॑म्। पय॑स्व॒च्छिरो॑ अस्तु॒ मे। पय॑स्वान् वि॒श्वत॑ः प्र॒त्यङ्। पय॑सा॒ संपि॑पृग्धिमा। आयु॑रसि। तत्ते॒ प्रय॑च्छामि। आयु॑ष्मदस्तु॒ मे॒ मुख॑म्। आयु॑ष्म॒च्छिरो॑ अस्तु॒ मे। आयु॑ष्मान् वि॒श्वत॑ः प्र॒त्यङ्। आयु॑षा॒ संपि॑पृग्धिमा। इ॒मम॑ग्न॒ आयु॑षे॒ वर्च॑से कृधि। प्रि॒यग्ं रेतो॑ वरुण सोमराजन्। मा॒तेवा॑स्मा अदिते॒

शर्म यच्छ। विश्वेदेवा जरदष्टिर्यथाऽसत्। आयुरसि विश्वायुरसि। सर्वायुरसि सर्वमायुरसि। यतो वातो मनोजवाः। यतः क्षरन्ति सिन्धवः। तासां त्वा सर्वासाग् रुचा। अभिषिञ्चामि वर्चसा। समुद्र इवासि गह्मना। सोम इवास्यदाभ्यः। अग्निरिव विश्वतः प्रत्यङ्। सूर्य इव ज्योतिषा विभूः। अपां यो द्रवणे रसः। तमहमस्मा आमुष्यायणाय। तेजसे ब्रह्मवर्चसाय गृह्णामि। अपां य ऊर्मौ रसः। तमहमस्मा आमुष्यायणाय। ओजसे वीर्याय गृह्णामि। अपां यो मध्यतो रसः। तमहमस्मा आमुष्यायणाय। पुष्ट्यै प्रजननाय गृह्णामि। अपां यो यज्ञियो रसः। तमहमस्मा आमुष्यायणाय। आयुषे दीर्घायुत्वाय गृह्णामि॥

अहमस्मि प्रथमजा ऋतस्य। पूर्वं देवेभ्यो अमृतस्य नाभिः। यो मा ददाति स इदेव मावाः। अहमन्नमन्नमदन्तमद्मि। पूर्वमग्नेरपि दहत्यन्नम्। यत्तौहासाते अहमुत्तरेषु। व्यात्तमस्य पशवस्सुजम्भम्। पश्यन्ति धीराः प्रचरन्ति पाकाः। जहाम्यन्यं न जहाम्यन्यम्। अहमन्नं वशमिच्चरामि। समानमर्थं पर्येमि भुञ्जत्। कोमामन्नं मनुष्यो दयेत। पराके अन्नं निहितं लोक एतत्। विश्वैर्देवैः पितृभिर्गुप्तमन्नम्। यदद्यते लुप्यते यत्परोप्यते। शततमी सा तनूर्मे बभूव। महान्तौ चरू संकृद्दुग्धेन पप्रौ। दिवं च पृश्नि पृथिवीं च साकम्। तथ्संपिबन्तो न मिनन्ति वेधसः। नैतद्भूयो भवति नो कनीयः। अन्नं प्राणमन्नमपानमाहुः। अन्नं मृत्युं तमुजीवातुमाहुः। अन्नं ब्रह्माणो जरसं वदन्ति। अन्नमाहुः प्रजननं प्रजानाम्। मोघमन्नं विन्दते अप्रचेताः। सत्यं ब्रवीमि वध

www.prapatti.com

इत्स तस्य॑। नार्य॒मणं॒ पुष्य॑ति॒ नो सखा॑यम्। केव॑लाघो भवति
केवला॒दी। अ॒हं मे॒घस्स्त॒नय॒न्वर्ष॑न्नस्मि। मामं॑दन्त्य॒हमं॑द्म्य॒न्यान्।
अ॒हग्ं सद॒मृतो॑ भवामि। मदादि॒त्या अधि॒ सर्वे॑ तपन्ति। दे॒वीं
वाचं॑मजनयन्त दे॒वाः। तां वि॒श्वरू॑पाः प॒शवो॑ वदन्ति। सा नो॑ म॒न्द्रेष॒मूर्जं॒
दुहा॑ना। धे॒नुर्वाग॒स्मानुप॒सुष्टु॒तैतु॑। यद्वाग्वद॑न्त्यविचेत॒नानि॑। राष्ट्री॑
दे॒वानां॑ निष॒साद॑म॒न्द्रा। चत॑स्र॒ ऊर्जं॑ दुदुहे॒ पया॑ग्ंसि। क्व॑स्विदस्याः
पर॒मं ज॑गाम। अ॒न॒न्ताम॒न्ता॒दधि॒ निर्मि॑तां म॒हीम्। यस्यां॑ दे॒वा
अ॑दधु॒र्भोज॑नानि। एका॑क्षरां द्वि॒पदा॒ग्ं॒ षट्प॑दां च। वाचं॑ दे॒वा उप॑जीवन्ति॒
विश्वे॑। वाचं॑ दे॒वा उप॑जीवन्ति॒ विश्वे॑। वाचं॑ गन्ध॒र्वाः प॒शवो॑ मनु॒ष्याः॑।
वा॒ची मा विश्वा॒ भुव॑ना॒न्यर्पि॑ता। सा नो॒ हवं॑ जुषता॒मिन्द्र॑पत्नी। वाग॒क्षरं॑
प्रथम॒जा ऋ॒तस्य॑। वेदा॑नां मा॒ताऽमृत॑स्य॒ नाभिः॑। सा नो॑ जु॒षा॒णोप॑
य॒ज्ञमागा॑त्। अव॑न्ती दे॒वी सु॒हवा॑ मे अस्तु। या मृष॑यो मन्त्र॒कृतो॑
मनी॒षिणः॑। अ॒न्वैच्छं॑न्दे॒वास्तप॑सा॒ श्रमे॑ण। तां दे॒वीं वाचग्ं॒ ह॒विषा॑
यजामहे। सा नो॑ दधातु सु॒कृत॑स्य लो॒के। च॒त्वारि॒ वाक्परि॑मिता प॒दानि॑।
तानि॑ विदुर्ब्राह्म॒णा ये म॑नी॒षिणः॑। गुहा॒ त्रीणि॒ निहि॑ता॒ नेङ्ग॑यन्ति। तु॒रीयं॑
वा॒चो म॑नु॒ष्या॑ वदन्ति। श्र॒द्धया॒ग्निस्समि॑ध्यते। श्र॒द्धया॑ विन्दते ह॒विः।
श्र॒द्धां भग॑स्य मू॒र्धनि॑। वच॒सा वे॑दयामसि। प्रि॒यग्ग् श्र॑द्धे॒ दद॑तः। प्रि॒यग्ग्
श्र॑द्धे॒ दिदा॑सतः। प्रि॒यं भो॒जेषु॒ यज्व॑सु। इ॒दं म॑ उदि॒तं कृ॑धि। यथा॑ दे॒वा
असु॑रेषु। श्र॒द्धामु॒ग्रेषु॑ चक्रि॒रे। ए॒वं भो॒जेषु॒ यज्व॑सु। अ॒स्माक॑मुदि॒तं कृ॑धि।
श्र॒द्धां दे॒वा यज॑मानाः। वा॒युगो॑पा॒ उपा॑सते। श्र॒द्धाग्ं॒ हृ॑द॒य्य॑याऽकू॑त्या।
श्र॒द्धया॑ हूयते ह॒विः। श्र॒द्धां प्रा॒तर्ह॑वामहे। श्र॒द्धां म॒ध्यंदि॑नं॒ परि॑। श्र॒द्धाग्ं॒

सू॒र्य॑स्य नि॒म्रुचि॑। श्र॒द्धे श्र॒द्धाप॑ये॒ ह॒मा᳚। श्र॒द्धा दे॒वान॑धि॑व॒स्ते॑। श्र॒द्धा विश्व॑मि॒दं जग॑त्। श्र॒द्धां काम॑स्य मा॒तर᳚म्। ह॒विषा॑ वर्धयामसि। ब्रह्म॑ ज॒ज्ञा॒नं प्र॑थ॒मं पु॒रस्ता᳚त्। विसी॑म॒तस्सु॒रुचो॑ वे॒न आ॑वः। स बु॒ध्निया॑ उप॒मा अ॑स्य वि॒ष्ठाः। स॒तश्च॒ योनि॒मस॑तश्च॒ विवः॑। पि॒ता वि॒राजा॑मृष॒भो र॑यी॒णाम्। अ॒न्तरि॑क्षं वि॒श्वरू॑प॒ आ वि॑वेश। तम॒र्कैर॒भ्य॑र्चन्ति व॒त्सम्। ब्रह्म॒ सन्तं॒ ब्रह्म॑णा व॒र्धय॑न्तः। ब्रह्म॑ दे॒वा न॑ जनयत्। ब्रह्म॒ विश्व॑मि॒दं जग॑त्। ब्रह्म॑णः क्ष॒त्रं निर्मि॑तम्। ब्रह्म॑ ब्राह्म॒ण आ॒त्मना᳚। अ॒न्तर॑स्मिन्नि॒मे लो॒काः। अ॒न्तर्विश्व॑मि॒दं जग॑त्। ब्रह्मै॒व भू॒ताना॒ं ज्येष्ठ᳚म्। तेन॒ को॑ऽर्हति॒ स्पर्धि॑तु॒म्। ब्रह्म॑न्दे॒वास्त्रय॑स्त्रिग्ं॒शत्। ब्रह्म॑न्निन्द्र प्रजाप॒ती। ब्रह्म॑न् ह॒ विश्वा॑ भू॒तानि॑। ना॒वीवा॒न्तस्स॒माहि॑ता। चत॑स्र॒ आशाः॒ प्रच॑रन्त्व॒ग्नय॑ः। इ॒मं नो॑ य॒ज्ञं न॑यतु प्रजा॒नन्। घृ॒तं पिन्व॑न्न॒जरग्ं॑ सु॒वीर᳚म्। ब्रह्म॑ स॒मिद्भ॑व॒त्याहु॑तीनाम्। आगावो॑ अ॒ग्मन्नु॒त भ॒द्रम॑क्रन्। सीद॑न्तु गो॒ष्ठे र॒णय॑न्त्व॒स्मे। प्र॒जाव॑तीः पु॒रु॒रूपा॑ इ॒ह स्युः। इन्द्रा॑य पू॒र्वीरु॒षसो॒ दुहा॑नाः। इन्द्रो॒ यज्व॑ने पृ॒ण॒ते च॑ शिक्षति। उपेद्द॑दाति॒ न स्वं मु॑षायति। भूयो॑ भूयो र॒यिमिद॑स्य व॒र्धय॑न्। अभि॑न्ने खि॒ल्ले निद॑धाति देव॒युम्। न ता न॑शन्ति॒ नद॑भाति॒ तस्क॑रः। नैना॑ अमि॒त्रो व्यथि॒राद॑धर्षति। दे॒वाग्श्च॒ याभि॒र्यज॑ते॒ ददा॑ति च। ज्योगित्ताभि॑स्सचते॒ गोप॑तिस्स॒ह। न ता अर्वा॑ रे॒णुक॑काटो अश्नुते। नसग्ग्ं॑स्कृत॒त्रमु॒प॑यन्ति॒ ता अ॒भि। उ॒रु॒गा॒यमभ॑यं॒ तस्य॒ ता अनु॑। गावो॒ मर्त्य॑स्य॒ विच॑रन्ति॒ यज्व॑नः। गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अ॒च्छात्। गाव॒स्सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः। इ॒मा या गाव॒स्सजं॑नास॒ इन्द्रः॑। इ॒च्छामीद्धृ॒दा मन॑सा चि॒दिन्द्र᳚म्। यू॒यं गा॑वो मेदयथा कृ॒शं॑चित्।

अश्लीलं चित्कृणुथा सुप्रतीकम्। भद्रं गृहं कृणुथ भद्रवाचः। बृहद्वो वयं उच्यते सभासु। प्रजावतीस्सूयवंसगंरिशन्तीः। शुद्धा अपस्सुंप्रपाणे पिबन्तीः। मावस्तेन ईशत माघशगंसः। परिवो हेती रुद्रस्य वृंज्यात्। उपेदमुंपपर्चनम्। आसु गोषूपं पृच्यताम्। उपरषभस्य रेतसि। उपेन्द्र तव वीर्ये॥

ता सूर्याचन्द्रमसा विश्वभृत्तमा महत्। तेजो वसुमद्राजतो दिवि। सामात्माना चरतस्सामचारिणा। ययोर्व्रतं नममे जातु देवयोः। उभावन्तौ परियात अम्र्या। दिवो न रश्मीग्स्तनुतो व्यर्णवे। उभा भुवन्ती भुवना कविक्रतू। सूर्या न चन्द्रा चरतो हतामती। पती द्युमद्विश्वविदा उभा दिवः। सूर्या उभा चन्द्रमसा विचक्षणा। विश्ववारा वरिवो भा वरेण्या। तानोऽवतं मतिमन्ता महिव्रता। विश्ववपरी प्रतरणा तरन्ता। सुवर्विदा दृशये भूरिरश्मी। सूर्या हि चन्द्रा वसुत्वेष दर्शता। मनस्विनो भानु चरतोऽनु संदिवम्। अस्य श्रवो नद्यस्सप्त बिभ्रति। द्यावा क्षामा पृथिवी दर्शतं वपुः। अस्मे सूर्याचन्द्रमसाऽभिचक्षे। श्रद्धेकमिन्द्र चरतो विचर्तुरम्। पुर्वापरं चरतो माययैतौ। शिशू क्रीडन्तौ परियातो अध्वरम्। विश्वान्यन्यो भुवनाऽभिचष्टे। ऋतूनन्यो विदधज्जायते पुनः। हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्तान आपश्शग्ग् स्योना भवन्तु। यासागं राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतश्शुचयो याः पावकास्तान आपश्शग्ग् स्योना भवन्तु। यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं

पय॑सो॒न्दन्ति॑ शु॒क्रास्तान् आप॒श्शग्ग् स्यो॒ना भ॑वन्तु। शि॒वेन॑ मा॒ चक्षु॑षा पश्यतापश्शि॒वया॑ त॒नु॒वोप॑स्पृशत॒ त्वच॑ं मे। सर्वा॑ग्ं अ॒ग्नीग्ं॑र॒फ्सु॒षदो॑ हु॒वे वो॒ मयि॒ वर्चो॒ बल॒मोजो॒ निध॑त्त। आपो॑ भ॒द्रा घृ॒तमिदाप॑ आसु॒र॒ग्नीषोमौ॑ बिभ्र॒त्याप॒ इत्ताः। ती॒व्रो रसो॑ मधु॒पृचा॑मरङ्ग॒म आ मा॑ प्रा॒णेन॑ स॒ह वर्च॑सागन्न्। आदित्प॑श्याम्यु॒त वा॑ शृणो॒म्या मा॒ घोषो॑ गच्छति॒ वाङ्न॑ आसाम्। मन्ये॑ भेजा॒नो अ॒मृत॑स्य॒ तर्हि॒ हिर॑ण्यवर्णा॒ अतृ॑पं य॒दाव॑ः। नास॑दासी॒न्नो सदा॑सीत्त॒दानी॑म्। नासी॒द्रजो॒ नो व्यो॑मा प॒रो यत्। किमाव॑रीव॒ः कुह॒कस्य॒ शर्मन्॑। अम्भ॒ः किमा॑सी॒द्गह॑नं गभी॒रम्। न मृ॒त्यु॒र॒मृत॑ं तर्हि॒ न। रात्रि॑या॒ अह्न॑ आसीत्प्रके॒तः। आनी॑दवा॒तग्ग् स्व॒धया॒ तदेक॑म्। तस्मा॑द्धा॒न्यं न प॒रः किञ्च॒नास॑। तम॑ आसी॒त्तम॑सा गू॒ढमग्रे॑ प्रके॒तम्। स॒लि॒लग्ं सर्व॑मा इ॒दम्। तु॒च्छेना॒भ्वपि॑हितं॒ यदासी॑त्। तम॑स॒स्तन्म॑हि॒ना जा॑य॒तैक॑म्। काम॒स्तदग्रे॒ सम॑वर्त॒ताधि॑। मन॑सो॒ रेत॑ः प्रथ॒मं यदासी॑त्। स॒तो बन्धु॒मस॑ति॒ निर॑विन्दन्न्। हृ॒दि प्र॒तीष्या॑ क॒वयो॑ मनी॒षा। ति॒र॒श्चीनो॒ वित॑तो र॒श्मिरे॑षाम्। अ॒धस्वि॑द॒ासी३ दु॒परि॑स्विदासी३ त्। रे॒तो॒धा आ॑सन्महि॒मा न॑ आसन्। स्व॒धा अ॒वस्तात्प्रय॑तिः प॒रस्ता॑त्। को अ॒द्धा वे॑द॒ क इ॒ह प्रवो॑चत्। कुत॒ आजा॑ता॒ कुत॑ इ॒यं विसृ॑ष्टिः। अ॒र्वाग्दे॒वा अ॒स्य वि॒सर्ज॑नाय। अथा॒ को वे॑द॒ यत॑ आब॒भूव॑। इ॒यं विसृ॑ष्टि॒र्यत॑ आब॒भूव॑। यदि॑ वा द॒धे यदि॑ वा॒ न। यो अ॒स्याध्य॑क्षः पर॒मे व्यो॑मन्न्। सो अ॒ङ्ग वे॑द॒ यदि॑ वा॒ न वेद॑। किग्ग्स्वि॒द्वन॒ं क उ॒ स वृ॒क्ष आ॑सीत्। यतो॒ द्यावा॑पृथि॒वी निष्ट॒त॒क्षुः। मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तत्। यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रयन्॑। ब्रह्म॒

वनं ब्रह्म सवृक्ष आसीत्। यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वः। ब्रह्माध्यतिष्ठद्भुवनानि धारयन्। प्रातरग्निं प्रातरिन्द्रग्ं हवामहे। प्रातर्मित्रावरुणा प्रातरश्विना। प्रातर्भगं पूषणं ब्रह्मणस्पतिम्। प्रातस्सोममुत रुद्रग्ं हुवेम। प्रातर्जितं भगमुग्रग्ं हुवेम। वयं पुत्रमदितेर्यो विधर्ता। आध्रश्चिद्यं मन्यमानस्तुरश्चित्। राजाचिद्यं भगं भक्षीत्याह। भग प्रणेतर्भग सत्यराधः। भगेमां धियमुदवददन्नः। भग प्रणो जनय गोभिरश्वैः। भग प्रनृभिर्नृवन्तस्स्याम। उतेदानीं भगवन्तस्स्याम। उत प्रपित्व उत मध्ये अह्नाम्। उतोदिता मघवन्थ्सूर्यस्य। वयं देवानाग्ं सुमतौ स्याम। भग एव भगवाग्ं अस्तु देवाः। तेन वयं भगवन्तस्स्याम। तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुर एता भवेह। समध्वरायोषसो नमन्त। दधिक्रावेव शुचये पदाय। अर्वाचीनं वसुविदं भगं नः। रथमिवाश्वा वाजिन आवहन्तु। अश्वावतीर्गोमतीर्न उषासः। वीरवतीस्सदमुच्छन्तु भद्राः। घृतं दुहाना विश्वतः प्रपीनाः। यूयं पात स्वस्तिभिस्सदा नः॥

अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिन्द्रियम्। इदमासां विचक्षणम्। हविरासं जुहोतन। यस्य भान्ति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा। सकृत्तिकाभिरभि संवसानः। अग्निर्नो देवस्सुविते दधातु॥ प्रजापते रोहिणी वेतु पत्नी। विश्वरूपा बृहती चित्रभानुः। सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदस्सवीराः। रोहिणी देव्युदगात्पुरस्तात्। विश्वा रूपाणि प्रतिमोदमाना। प्रजापतिग्ं हविषा वर्धयन्ती। प्रिया देवानामुपयातु यज्ञम्॥ सोमो राजा मृगशीर्षेण

आगन्। शिवं नक्षत्रं प्रियमस्य धाम। आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु। यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियग्ं राजन् प्रियतमं प्रियाणाम्। तस्मै ते सोम हविषा विधेम। शं न एधि द्विपदे शं चतुष्पदे॥ आर्द्रया रुद्रः प्रथमान एति। श्रेष्ठो देवानां पतिरघ्नियानाम्। नक्षत्रमस्य हविषा विधेम। मा नः प्रजाग्ं रीरिषन्मोत वीरान्। हेती रुद्रस्य परिणो वृणक्तु। आर्द्रा नक्षत्रं जुषताग्ं हविर्नः। प्रमुञ्चमानौ दुरितानि विश्वा। अपाघशग्ं संनुदतामरातिम्॥ पुनर्नो देव्यदितिस्पृणोतु। पुनर्वसू नः पुनरेतां यज्ञम्। पुनर्नो देवा अभियन्तु सर्वे। पुनः पुनर्वो हविषा यजामः। एवा न देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा। पुनर्वसू हविषा वर्धयन्ती। प्रियं देवानामप्येतु पाथः॥ बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्रमभि संबभूव। श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशोऽनु सर्वा अभयं नो अस्तु। तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर्नः परिपातु पश्चात्। बाधेतां द्वेषो अभयं कृणुताम्। सुवीर्यस्य पतयस्स्याम॥ इदग्ं सर्पेभ्यो हविरस्तु जुष्टम्। आश्रेषा येषामनुयन्ति चेतः। ये अन्तरिक्षं पृथिवीं क्षियन्ति। ते नस्सर्पासो हवमागमिष्ठाः। ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवीमनु सञ्चरन्ति। येषामाश्रेषा अनुयन्ति कामम्। तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि॥ उपहूताः पितरो ये मघासु। मनोजवसस्सुकृतस्सुकृत्याः। ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुषन्ताम्। ये अग्निदग्धा येऽनग्निदग्धाः। येऽमुं लोकं पितरः क्षियन्ति। याग्श्च विद्मयाग्ं उ च न प्रविद्म। मघासु यज्ञग्ं सुकृतं जुषन्ताम्॥ गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन्वरुण

मित्रचारु। तं त्वा वयगं संनितारगं सनीनाम्। जीवा जीवन्तमुप संविशेम। येनेमा विश्वा भुवनानि सञ्जिता। यस्य देवा अनुसंयन्ति चेतः। अर्यमा राजाऽजरस्तुविष्मान्। फल्गुनीनामृषभो रोरवीति॥ श्रेष्ठो देवानां भगवो भगासि। तत्त्वा विदुः फल्गुनीस्तस्य वित्तात्। अस्मभ्यं क्षत्रमजरगं सुवीर्यम्। गोमदश्ववदुप संनुदेह। भगो ह दाता भग इत्प्रदाता। भगो देवीः फल्गुनीराविवेश। भगस्येत्तं प्रसवं गमेम। यत्र देवैस्सधमादं मदेम॥ आयातु देवस्सवितोपयातु। हिरण्ययेन सुवृता रथेन। वहन् हस्तगं सुभगं विद्मनापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ। हस्तः प्रयच्छत्वमृतं वसीयः। दक्षिणेन प्रतिगृभ्णीम एनत्। दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥ त्वष्टा नक्षत्रमभ्येति चित्राम्। सुभगं संसंयुवतिगं रोचमानाम्। निवेशयन्नमृतान्मर्त्याग्ंश्च। रूपाणि पिगंशन्भुवनानि विश्वा। तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नः प्रजां वीरवतीगं सनोतु। गोभिर्नो अश्वैस्समनक्तु यज्ञम्॥ वायुर्नक्षत्रमभ्येति निष्ट्याम्। तिग्मशृंगो वृषभो रोरुवाणः। समीरयन्भुवना मातरिश्वा। अप द्वेषागंसि नुदतामरातीः। तन्नो वायस्तदु निष्ट्या शृणोतु। तन्नक्षत्रं भूरिदा अस्तु मह्यम्। तन्नो देवासो अनुजानन्तु कामम्। यथा तरेम दुरितानि विश्वा॥ दूरमस्मच्छत्रवो यन्तु भीताः। तदिन्द्राग्नी कृणुतां तद्विशाखे। तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात्पुरस्तादभयं नो अस्तु। नक्षत्राणामधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ। विषूचश्शत्रूनपबाधमानौ। अपक्षुधं नुदतामरातिम्॥ पूर्णा पश्चादुत पूर्णा पुरस्तात्। उन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्तः।

उ॒त्त॒मे नाक॑ इ॒ह मा॑दयन्ताम्। पृ॒थ्वी सु॒वर्चा॑ यु॒व॒तिः स॒जोषाः᳚॥
पौ॒र्ण॒मा॒स्यु॑द॒गा॒च्छोभ॑माना। आ॒प्या॒यय॑न्ती दु॒रि॒तानि॒ विश्वा᳚। उ॒रुं दुहां॒
यज॑मानाय य॒ज्ञम्॥

ऋ॒द्ध्यास्म॑ ह॒व्यैर्नम॑सोप॒सद्य॑। मि॒त्रं दे॒वं मि॑त्र॒धेयं॑ नो अस्तु।
अ॒नू॒रा॒धान् ह॒विषा॑ व॒र्धय॑न्तः। श॒तं जीवे॑म श॒रद॒स्सवी॑राः।
चि॒त्रं नक्ष॑त्र॒मुद॑गात्पु॒रस्ता᳚त्। अ॒नू॒रा॒धास॒ इति॒ यद्वद॑न्ति। तन्मि॒त्र
ए॑ति प॒थिभि॑र्दे॒व॒यानैः᳚। हि॒र॒ण्ययै॒र्वित॑तैर॒न्तरि॑क्षे॥ इन्द्रो᳚ ज्ये॒ष्ठामनु॒
नक्ष॑त्रमेति। यस्मि॑न् वृ॒त्रं वृ॑त्र॒तूर्ये॑ त॒तार॑। तस्मि॑न्व॒यम॒मृतं॒ दुहा॑नाः।
क्षुधं॑ तरेम॒ दुरि॑तिं॒ दुरि॑ष्टिम्। पु॒र॒न्द॒राय॑ वृ॒ष॒भाय॑ धृ॒ष्णवे᳚। अषा॑ढाय॒
सह॑मानाय मी॒ढुषे᳚। इन्द्रा॑य ज्ये॒ष्ठा मधु॑म॒द्दुहा॑ना। उ॒रुं कृ॑णोतु॒
यज॑मानाय लो॒कम्॥ मूलं॑ प्र॒जां वी॒रव॑तीं विदेय। परा᳚च्येतु॒ निर्ऋ॑तिः
प॒राचा। गोभि॒र्नक्ष॑त्रं प॒शुभि॒स्सम॑क्तम्। अह॑र्भूया॒द्यज॑मानाय॒ मह्य᳚म्।
अह॑र्नो अ॒द्य सु॑वि॒ते द॑धातु। मूलं॒ नक्ष॑त्र॒मिति॒ यद्वद॑न्ति। परा॑चीं
वा॒चा निर्ऋ॑तिं नु॒दामि। शि॒वं प्र॒जायै॑ शि॒वम॑स्तु॒ मह्य᳚म्॥ या
दि॒व्या आप॒ः पय॑सा सम्बभू॒वुः। या अ॒न्तरि॑क्ष उ॒त पार्थि॑वी॒र्याः।
यासा॑मषा॒ढा अ॑नु॒यन्ति॒ काम᳚म्। ता न॒ आप॒श्शग्ग् स्यो॒ना
भ॑वन्तु। याश्च॒ कूप्या॒ याश्च॑ ना॒द्याः᳚स्समु॒द्रियाः᳚। याश्च॑ वैश॒न्तीरु॒त
प्रा॑स॒चीर्याः᳚। यासा॑मषा॒ढा मधु॑ भ॒क्षय॑न्ति। ता न॒ आप॒श्शग्ग् स्यो॒ना
भ॑वन्तु॥ तन्नो॒ विश्वे॒ उप॑ शृण्वन्तु दे॒वाः। तद॑षा॒ढा अ॒भिसंय॑न्तु
य॒ज्ञम्। तन्नक्ष॑त्रं प्रथतां प॒शुभ्यः॑। कृ॒षिर्वृ॒ष्टिर्यज॑मानाय कल्पताम्।
शु॒भ्राः क॒न्या॑ यु॒व॒तय॑स्सु॒पेश॑सः। क॒र्म॒कृत॑स्सु॒कृतो॑ वी॒र्याव॑तीः।

विश्वान्देवान् हविषा वर्धयन्तीः। अषाढाः काममुपयान्तु यज्ञम्॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्। अमुं च लोकमिदमूच सर्वम्। तन्नो नक्षत्रमभिजिद्विजित्य। श्रियं दधात्वहृणीयमानम्। उभौ लोकौ ब्रह्मणा संजितेमौ। तन्नो नक्षत्रमभिजिद्विचष्टाम्। तस्मिन्वयं पृतनास्सं जयेम। तन्नो देवासो अनुजानन्तु कामम्॥ शृण्वन्ति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उपशृणोमि वाचम्। महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीं मेनागं हविषा यजामः। त्रेधा विष्णुरुरुगायो विचक्रमे। महीं दिवं पृथिवीमन्तरिक्षम्। तच्छ्रोणैति श्रव इच्छमाना। पुण्यग्ग् श्लोकं यजमानाय कृण्वती॥ अष्टौ देवा वसवस्सोम्यासः। चतस्रो देवीरजराश्श्रविष्ठाः। ते यज्ञं पान्तु रजसः परस्तात्। संवथ्सरीणममृतग्ग् स्वस्ति। यज्ञं नः पान्तु वसवः पुरस्तात्। दक्षिणतोऽभियन्तु श्रविष्ठाः। पुण्यं नक्षत्रमभि संविशाम। मा नो अरातिरघशग्ं साऽगन्॥ क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्राणागं शतभिषग्वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः। शतग्ं सहस्रा भेषजानि धत्तः। यज्ञं नो राजा वरुण उपयातु। तन्नो विश्वे अभि संयन्तु देवाः। तन्नो नक्षत्रग्ं शतभिषग्जुषाणम्। दीर्घमायुः प्रतिरद्भेषजानि॥ अज एकपादुदगात्पुरस्तात्। विश्वा भूतानि प्रति मोदमानः। तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः। विभ्राजमानस्समिधान उग्रः। आऽन्तरिक्षमरुहदगन्द्याम्। तग्ं सूर्यं देवमजमेकपादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥ अहिर्बुध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणाम्। तं ब्राह्मणास्सोमपास्सोम्यासः। प्रोष्ठपदासो अभिरक्षन्ति सर्वे। चत्वार

एक॑म॒भि कर्म॑ दे॒वाः। प्रो॒ष्ठ॒प॒दास॒ इति॒यान् वद॑न्ति। ते बु॒ध्निय॑ं परि॒षद्य॑ग्ग्॒ स्तु॒वन्त॑ः। अहि॑ग्ं॒ रक्षन्ति॒ नम॑सोप॒सद्य॑॥ पू॒षा रे॒वत्यन्वे॑ति॒ पन्था᳚म्। पु॒ष्टि॒पती॑ पशु॒पा वाज॑बस्त्यौ। इ॒मानि॑ ह॒व्या प्रय॑ता जु॒षा॒णा। सु॒गैर्नो॒ यानै॒रुप॑यातां य॒ज्ञम्। क्षु॒द्रान्प॒शून्र॑क्षतु रे॒वती॑ नः। गावो॑ नो॒ अश्वा॒ग्ं॒ अन्वे॑तु पू॒षा। अन्न॒ग्ं॒ रक्ष॑न्तौ बहु॒दा विरू॑पम्। वाज॑ग्ं स॒नुतां॒ यज॑मानाय य॒ज्ञम्॥ तद॒श्विना॑वश्व॒युजोप॑याताम्। शुभं॒ गमि॑ष्ठौ सु॒यमे॑भि॒रश्वैः᳚। स्वं नक्ष॑त्रग्ं ह॒विषा॒ यज॑न्तौ। मध्वा॒ सम्पृ॑क्तौ॒ यजु॑षा॒ सम॑क्तौ। यौ दे॒वानां᳚ भि॒षजौ॑ हव्यवा॒हौ। विश्व॑स्य दू॒ताव॒मृत॑स्य गो॒पौ। तौ नक्ष॑त्रं जुजु॒षा॒णोप॑याताम्। नमो॒ऽश्विभ्यां᳚ कृणु॒मोऽश्व॒युग्भ्या᳚म्॥ अप॑ पा॒प्मानं॒ भर॑णीर्भरन्तु। तद्य॒मो राजा॒ भग॑वा॒न् विच॑ष्टाम्। लो॒कस्य॒ राजा॑ मह॒तो म॒हान् हि। सु॒गं नः॒ पन्था॒मभ॑यं कृणोतु। यस्मि॒न्नक्ष॑त्रे य॒म एति॒ राजा᳚। यस्मि॑न्नेनम॒भ्यषि॑ञ्चन्त दे॒वाः। तद॑स्य चि॒त्रग्ं ह॒विषा॑ यजाम। अप॑ पा॒प्मानं॒ भर॑णीर्भरन्तु। नि॒वेश॑नी स॒ङ्गम॑नी॒ वसू॑नां॒ विश्वा॑ रू॒पाणि॒ वसू᳚न्यावे॒शय॑न्ती। स॒ह॒स्र॒पो॒षग्ं सु॒भगा॒ ररा॑णा॒ सा न॒ आग॒न्वर्च॑सा संविदा॒ना। यत्ते॑ दे॒वा अद॑धुर्भाग॒धेय॒ममा॑वास्ये सं॒वस॑न्तो महि॒त्वा। सा नो॑ य॒ज्ञं पि॑पृहि विश्ववारे र॒यिं नो॑ धेहि सुभगे सु॒वीर᳚म्॥

नवो॑नवो भवति॒ जाय॑मा॒नोऽह्ना᳚ं के॒तु॒रु॒षसा॑मे॒त्यग्रे᳚। भा॒गं दे॒वेभ्यो॒ विद॑धात्या॒यन् प्रच॒न्द्रमा᳚स्तिरति दी॒र्घमायु॑ः। यमा॑दि॒त्या अ॒ग्ं॒शुमा᳚प्या॒यय॑न्ति॒ यमक्षि॑त॒मक्षि॑तय॒ः पिब॑न्ति। तेन॑ नो॒ राजा॒ वरु॑णो॒ बृह॒स्पति॒राप्या॑ययन्तु॒ भुव॑नस्य गो॒पाः। ये विरू॑पे॒ सम॑नसा सं॒व्यय॑न्ती। स॒मा॒नं तन्तु॑ं परितात॒नाते᳚। वि॒भू प्र॒भू अ॑नु॒भू वि॒श्वतो॑

हुवे। ते नो नक्षत्रे हवमागमेतम्। वयं देवी ब्रह्मणा संविदानाः। सुरत्नासो देववीतिं दधानाः। अहोरात्रे हविषा वर्धयन्तः। अति पाप्मानमतिं मुक्त्या गमेम। प्रत्युवदृश्यायती। व्युच्छन्ती दुहिता दिवः। अपो मही वृणुते चक्षुषा। तमो ज्योतिष्कृणोति सूनरी। उदुस्त्रियाँस्सचते सूर्यः। सचा उद्यन्नक्षत्रमर्चिमत्। तवेदुषो व्युषि सूर्यस्य च। संभक्तेन गमेमहि। तन्नो नक्षत्रमर्चिमत्। भानुमत्तेज उच्चरत्। उपयज्ञमिहागमत्। प्रनक्षत्राय देवाय। इन्द्रायेन्दुग्ं हवामहे। स नस्सविता सुवथ्सनिम्। पुष्टिदां वीरवत्तमम्। उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्। चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आऽप्रा द्यावापृथिवी अन्तरिक्षग्ं सूर्य आत्मा जगतस्तस्थुषश्च। अदितिर्न उरुष्यत्वदितिश्शर्म यच्छतु। अदितिः पात्वग्ंहसः। महीमूषु मातरग्ं सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीग्ं सुशर्माणमदितिग्ं सुप्रणीतिम्। इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाग्ंसुरे। प्रतद्विष्णुस्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा। अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाग्ं रेताग्ंसि जिन्वति। भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः। दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम्। अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतां दाशुषे मयः। अन्विदनुमते त्वं मन्यासै शंचनः कृधि। क्रत्वे दक्षाय नो हिनु प्रण आयूग्ंषि तारिषः।

ह॒व्य॒वाह॑मभिमाति॒षाह᳚म्। र॒क्षो॒हणं॑ पृत॑नासु॒ जि॒ष्णु॒म्। ज्योति॑ष्मन्तं॒ दीद्य॑तं॒ पुर॑न्धिम्। अ॒ग्निग्ग्॒ स्वि॑ष्ट॒कृत॒मा हु॑वेम। स्वि॑ष्टमग्ने अ॒भि तत्पृ॑णाहि। विश्वा॑ देव॒ पृत॑ना अ॒भिष्य। उ॒रुं न॒ः पन्था᳚ प्रदि॒शन्विभा॑हि। ज्योति॑ष्मद्धेह्य॒जर॑ं न॒ आयु॑ः॥

अ॒ग्नये॒ स्वाहा॒ कृत्ति॑काभ्य॒स्स्वाहा᳚। अ॒म्बायै॒ स्वाहा॑ दु॒लायै॒ स्वाहा᳚। नि॒त॒त्न्यै स्वाहा॒ऽभ्रय॑न्त्यै॒ स्वाहा᳚। मे॒घय॑न्त्यै॒ स्वाहा॑ व॒र्॒षय॑न्त्यै॒ स्वाहा᳚। चु॒पु॒णीका॑यै॒ स्वाहा᳚। प्र॒जाप॑तये॒ स्वाहा॑ रोहि॒ण्यै स्वाहा᳚। रोच॑मानायै॒ स्वाहा᳚ प्र॒जाभ्य॒स्स्वाहा᳚। सोमा॑य॒ स्वाहा॑ मृगशी॒र्॒षाय॒ स्वाहा᳚। इ॒न्व॒काभ्य॒स्स्वाहौष॑धीभ्य॒स्स्वाहा᳚। रा॒ज्याय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। रु॒द्राय॒ स्वाहा॒ऽर्द्रायै॒ स्वाहा᳚। पिन्व॑मानायै॒ स्वाहा॑ प॒शुभ्य॒स्स्वाहा᳚। अदि॑त्यै॒ स्वाहा॒ पुन॑र्वसुभ्याम्। स्वाहा॒ऽभू᳚त्यै॒ स्वाहा॒ प्रजा᳚त्यै॒ स्वाहा᳚। बृह॒स्पत॑ये॒ स्वाहा॑ ति॒ष्या॑य॒ स्वाहा᳚। ब्र॒ह्म॒व॒र्च॒साय॒ स्वाहा᳚। स॒र्पेभ्य॒स्स्वाहा᳚ऽश्रे॒षाभ्य॒स्स्वाहा᳚। द॒न्द॒शूके᳚भ्य॒स्स्वाहा᳚। पि॒तृभ्य॒स्स्वाहा॑ म॒घाभ्य॑ः। स्वाहा॑ऽन॒घाभ्य॒स्स्वाहा॑ऽग॒दाभ्य॑ः। स्वाहा॑ऽरुन्ध॒तीभ्य॒स्स्वाहा᳚। अ॒र्य॒म्णे स्वाहा॒ फल्गु॑नीभ्या॒ग्॒ स्वाहा᳚। प॒शुभ्य॒स्स्वाहा᳚। भगा॑य॒ स्वाहा॒ फल्गु॑नीभ्या॒ग्॒ स्वाहा᳚। श्रैष्ठ्या॑य॒ स्वाहा᳚। स॒वि॒त्रे स्वाहा॒ हस्ता॑य। स्वाहा॑ दद॒ते स्वाहा॑ पृण॒ते। स्वाहा᳚ प्र॒यच्छ॑ते॒ स्वाहा᳚ प्रतिगृभ्ण॒ते स्वाहा᳚। त्वष्ट्रे॒ स्वाहा॑ चि॒त्रायै॒ स्वाहा᳚। चैत्रा॑य॒ स्वाहा᳚ प्र॒जायै॒ स्वाहा᳚। वा॒यवे॒ स्वाहा॒ निष्ट्या॑यै॒ स्वाहा᳚। का॒म॒चारा॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। इ॒न्द्रा॒ग्निभ्या॒ग्॒ स्वाहा॒ विशा॑खाभ्या॒ग्॒ स्वाहा᳚। श्रैष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। पौ॒र्ण॒मा॒स्यै स्वाहा॒ कामा॑य॒ स्वाहा॒ऽग॑त्यै॒ स्वाहा᳚॥

मि॒त्राय॒ स्वाहा॑ऽनू॒रा॒धेभ्य॒स्स्वाहा᳚। मि॒त्र॒धेया॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। इन्द्रा॑य॒ स्वाहा᳚ ज्ये॒ष्ठायै॒ स्वाहा᳚। ज्यै॒ष्ठ्या॑य॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। प्र॒जाप॑तये॒ स्वाहा॒ मूला॑य॒ स्वाहा᳚। प्र॒जायै॒ स्वाहा᳚। अ॒द्भ्यस्स्वाहा॑ऽषा॒ढाभ्य॒स्स्वाहा᳚। स॒मु॒द्राय॒ स्वाहा॒ कामा॑य॒ स्वाहा᳚। अ॒भिजि॑त्यै॒ स्वाहा᳚। विश्वे᳚भ्यो दे॒वेभ्य॒स्स्वाहा॑ऽषा॒ढाभ्य॒स्स्वाहा᳚। अ॒न॒प॒ज॒य्याय॒ स्वाहा॒ जित्यै॒ स्वाहा᳚। ब्रह्म॑णे॒ स्वाहा॑ऽभि॒जि॒ते॒ स्वाहा᳚। ब्र॒ह्म॒लो॒काय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। विष्ण॑वे॒ स्वाहा᳚ श्रो॒णायै॒ स्वाहा᳚। श्लोका॑य॒ स्वाहा᳚ श्रु॒ताय॒ स्वाहा᳚। वसु॑भ्य॒स्स्वाहा॒ श्रवि॑ष्ठाभ्य॒स्स्वाहा᳚। अ॒ग्राय॒ स्वाहा॒ परी᳚त्यै॒ स्वाहा᳚। वरु॑णाय॒ स्वाहा॑ श॒तभि॑षजे॒ स्वाहा᳚। भे॒ष॒जेभ्य॒स्स्वाहा᳚। अ॒जायैक॑पदे॒ स्वाहा᳚ प्रोष्ठप॒देभ्य॒स्स्वाहा᳚। तेज॑से॒ स्वाहा᳚ ब्रह्मवर्च॒साय॒ स्वाहा᳚। अहि॑ये बु॒ध्निया॑य॒ स्वाहा᳚ प्रोष्ठप॒देभ्य॒स्स्वाहा᳚। प्र॒ति॒ष्ठायै॒ स्वाहा᳚। पू॒ष्णे स्वाहा॑ रे॒वत्यै॒ स्वाहा᳚। प॒शुभ्य॒स्स्वाहा᳚। अ॒श्विभ्या॒ग्॒ स्वाहा᳚ऽश्व॒यु॒ग्भ्या॒ग्॒ स्वाहा᳚। श्रोत्रा॑य॒ स्वाहा॒ श्रु॒त्यै॒ स्वाहा᳚। य॒माय॒ स्वाहा॑ऽप॒भर॑णीभ्य॒स्स्वाहा᳚। रा॒ज्याय॒ स्वाहा॒ऽभिजि॑त्यै॒ स्वाहा᳚। अ॒मा॒वा॒स्या॑यै॒ स्वाहा॒ कामा॑य॒ स्वाहा॒ऽग॑त्यै॒ स्वाहा᳚॥

च॒न्द्रम॑से॒ स्वाहा᳚ प्रती॒दृश्या॑यै॒ स्वाहा᳚। अ॒हो॒रा॒त्रेभ्य॒स्स्वाहा᳚ऽर्धमा॒से-भ्य॒स्स्वाहा᳚। मासे᳚भ्य॒स्स्वाह॒र्तुभ्य॒स्स्वाहा᳚। सं॒व॒त्स॒राय॒ स्वाहा᳚। अह्ने॒ स्वाहा॒ रात्रि॑यै॒ स्वाहा᳚। अति॑मु॒क्त्यै॒ स्वाहा᳚। उ॒ष॒से॒ स्वाहा॒ व्यु॑ष्ट्यै॒ स्वाहा᳚। व्यू॒षु॒ष्यै॒ स्वाहा᳚ व्यु॒च्छ॒न्त्यै॒ स्वाहा᳚। व्यु॑ष्टायै॒ स्वाहा᳚। नक्ष॑त्राय॒ स्वाहो॑देष्य॒ते स्वाहा᳚। उ॒द्यु॒ते स्वाहोदि॑ताय॒ स्वाहा᳚। हर॑से॒ स्वाहा॒ भर॑से॒ स्वाहा᳚। भ्राज॑से॒

www.prapatti.com

स्वाहा॒ तेज॑से॒ स्वाहा᳚। तप॑से॒ स्वाहा᳚ ब्रह्मवर्च॒साय॒ स्वाहा᳚। सू॒र्या॑य॒ स्वाहा॒ नक्ष॑त्रेभ्य॒स्स्वाहा᳚। प्र॒ति॒ष्ठायै॒ स्वाहा᳚। अदि॑त्यै॒ स्वाहा᳚ प्र॒ति॒ष्ठायै॒ स्वाहा᳚। विष्ण॑वे॒ स्वाहा॑ य॒ज्ञाय॒ स्वाहा᳚। प्र॒ति॒ष्ठायै॒ स्वाहा᳚॥

द॒धि॒क्राव्ण्णो॑ अकारिषं जि॒ष्णोरश्व॑स्य वा॒जिन॑:। सु॒र॒भि नो॒ मु॒खा॑कर॒त्प्रण॒ आयू॒ꣳ॑षि तारिषत्॥ आपो॒ हिष्ठा म॑यो॒ भु॒व॒स्तान॑ ऊ॒र्जे द॑धातन। म॒हेरणा॑य॒ चक्ष॑से। यो व॑श्शि॒वत॑मो॒ रस॒स्तस्य॑ भाजयते॒ह न॑:। उ॒श॒तीरि॑व मा॒तर॑:। तस्मा॒ अरं॑ गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ। आपो॑ ज॒नय॑था च नः॥

उदु॑त्त॒मं व॑रुण॒ पाश॑म॒स्मदवा॑ध॒मं विम॑ध्य॒मग्ग्॒ श्र॑थाय। अथा॑ व॒यमा॑दित्य व्र॒ते तवाना॑गसो॒ अदि॑तये स्याम। अस्त॑भ्ना॒द्द्यामृ॑ष॒भो अ॒न्तरि॑क्ष॒ममि॑मीत व॒रि॒माणं॑ पृथि॒व्या आसी॑द॒द्विश्वा॒ भुव॑नानि स॒म्राड्विश्वेत्तानि॒ वरु॑णस्य व्र॒तानि॑। यत्किञ्चे॒दं व॑रुण॒ दैव्ये॒ जने॑ऽभिद्रो॒हं म॑नु॒ष्या᳚श्चरा॑मसि। अचि॑त्ती॒ यत्तव॒ धर्मा॑ यु॒योपि॒म मा न॒स्तस्मा॒देन॑सो देव रीरिषः। कि॒त॒वासो॒ यद्रि॑रि॒पुर्न दी॒वि यद्वा॑घा स॒त्यमु॒त यन्न वि॒द्म। सर्वा॒ ता विष्य॑ शिथि॒रेव॑ दे॒वाथा॑ ते स्याम वरुण प्रि॒यास॑:। अव॑ ते॒ हेडो॑ वरुण॒ नमो॑भि॒रव॑ य॒ज्ञेभि॑रीमहे ह॒विर्भि॑:। क्षय॑न्न॒स्मभ्य॑मसुर प्रचेतो॒ राज॒न्नेनाꣳ॑सि शिश्रथः कृ॒तानि॑॥

तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मान॒स्तदा शा᳚स्ते॒ यज॑मानो ह॒विर्भि॑:। अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑शꣳस॒ मा न॒ आयु॑: प्रमो॑षीः॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः। अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शग्ग् स्योना भवन्तु। यासाग्ं राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतश्शुचयो याः पावकास्ता न आपश्शग्ग् स्योना भवन्तु। यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति। याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्शग्ग् स्योना भवन्तु। शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोप स्पृशत त्वचं मे। सर्वाग् अग्नीग्ंरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त। यददस्सं प्रयतीरहावनदताहते। तस्मादा नद्यो नामस्थ ता वो नामानि सिन्धवः। यत्प्रेषिता वरुणेन ताश्शीभग्ं समवल्गत। तदाप्नोदिन्द्रोवो यतीस्तस्मादापो अनु स्थन। अपकामग्ग् स्यन्दमाना अवीवरत वो हिकम्। इन्द्रो वश्शक्तिभिर्देवी स्तस्माद्वार्णाम वो हितम्। एको देवो अप्यतिष्ठथ्स्यन्दमाना यथावशम्। उदानिषुर्महीरिति तस्मादुदकमुच्यते। आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः। तीव्रो रसो मधुपृचामरङ्गम आ मा प्राणेन सह वर्चसा गन्। आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्न आसाम्। मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः। आपो हिष्ठा मयो भुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे। यो वश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः। दिवि श्रयस्वान्तरिक्षे यतस्व पृथिव्या संभव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा॥

पव॑मान॒स्सु॒व॒र्जनः॑। प॒वित्रे॑ण॒ विच॑र्षणिः। यः पोता॒ स पु॑नातु॒ मा। पु॒नन्तु॑ मा देव ज॒नाः। पु॒नन्तु॒ मन॑वो धि॒या। पु॒नन्तु॒ विश्व॑ आ॒यवः॑। जात॑वेदः प॒वित्र॑वत्। प॒वित्रे॑ण पुनाहि मा। शु॒क्रेण॑ दे॒व दीद्य॑त्। अग्ने॒ क्रत्वा॒ क्रतू॒ꣳ॒ रनु॑। यत्ते॑ प॒वित्र॑म॒र्चिषि॑। अग्ने॒ वित॑तमन्त॒रा। ब्रह्म॒ तेन॑ पुनीमहे। उ॒भाभ्या᳚ं देव सवितः। प॒वित्रे॑ण स॒वेन॑ च। इ॒दं ब्रह्म॑ पुनीमहे। वै॒श्व॒दे॒वी पु॑न॒ती दे॒व्यागा᳚त्। यस्यै॑ ब॒ह्वीस्त॒नुवो॑ वी॒तपृ॑ष्ठाः। तया॒ मद॑न्तस्सध॒माद्ये॑षु। व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्। वै॒श्वा॒न॒रो र॒श्मिभि॑र्मा पुनातु। वातः॑ प्रा॒णेने॑षि॒रो म॑यो॒भूः। द्यावा॑पृथि॒वी पय॑सा॒ पयो॑भिः। ऋ॒ताव॑री य॒ज्ञिये॑ मा पुनीताम्। बृ॒हद्भि॑स्सवित॒स्तृभिः॑। वर्षि॑ष्ठैर्देव॒ मन्म॑भिः। अग्ने॒ दक्षैः᳚ पुनाहि मा। येन॑ दे॒वा अपु॑नत। येनापो॑ दि॒व्यं कशः॑। तेन॑ दि॒व्येन॒ ब्रह्म॑णा। इ॒दं ब्रह्म॑ पुनीमहे। यः पा॑वमा॒नीर॒ध्येति॑। ऋषि॑भि॒स्सम्भृ॑त॒ꣳ॒ रस᳚म्। सर्व॒ꣳ॒ स पू॒तम॑श्नाति। स्व॒दि॒तं मा॑त॒रिश्व॑ना। पा॒व॒मा॒नीर्यो अ॒ध्येति॑। ऋषि॑भि॒स्सम्भृ॑त॒ꣳ॒ रस᳚म्। तस्मै॒ सर॑स्वती दुहे। क्षी॒रꣳ स॒र्पिर्मधू॑द॒कम्। पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः। सु॒दुघा॒ हि पय॑स्वतीः। ऋषि॑भि॒स्सम्भृ॑तो॒ रसः॑। ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम्। पा॒व॒मा॒नीर्दि॑शन्तु नः। इ॒मं लो॒कमथो॑ अ॒मुम्। कामा॒न्थ्सम॑र्धयन्तु नः। दे॒वीर्दे॒वैस्स॒माभृ॑ताः। पा॒व॒मा॒नीस्स्व॒स्त्यय॑नीः। सु॒दुघा॒ हि घृ॒त॒श्चुतः॑। ऋषि॑भि॒स्संभृ॑तो॒ रसः॑। ब्रा॒ह्म॒णेष्व॒मृत॑ꣳ हि॒तम्। येन॑ दे॒वाः प॒वित्रे॑ण। आ॒त्मान॑ं पु॒नते॒ सदा᳚। तेन॑ स॒हस्र॑धारेण। पा॒व॒मा॒न्यः पु॑नन्तु मा। प्रा॒जा॒प॒त्यं प॒वित्र᳚म्। श॒तोद्या॑मꣳ हि॒र॒ण्मय᳚म्। तेन॑ ब्रह्म॒ विदो॑ व॒यम्। पू॒तं ब्रह्म॑ पुनीमहे। इन्द्र॑स्सुनी॒ती स॒ह मा॑ पुनातु। सोम॑स्स्व॒स्त्या

वरु॑णस्स॒मीच्या॓। य॒मो राजा॓ प्रमृ॒णाभि॑ः पु॒नातु॒ मा। जा॒तवे॑दा मो॒र्जय॑न्त्या पु॒नातु॒॥ भू॒र्भु॒व॒स्सु॒व॑ः॥

तच्छं॒ योरावृ॑णीमहे। गा॒तुं य॒ज्ञाय॑। गा॒तुं य॒ज्ञप॑तये। दैवी॓स्स्व॒स्तिर॑स्तु॒ नः। स्व॒स्तिर्मानु॑षेभ्यः। ऊ॒र्ध्वं जि॑गातु भेष॒जम्। शं नो॑ अस्तु द्वि॒पदे॓। शं चतु॑ष्पदे। ओं शान्ति॒श्शान्ति॒श्शान्ति॑ः॥

यो ब्र॒ह्मा ब्रह्मण उ॑ज्जभा॒र प्रा॒णैश्शिर॑ः कृत्तिवासा॓ः पिना॒की। ईशानो देवस्स न आयु॑र्दधा॒तु॒ तस्मै॑ जु॒होमि ह॒विषा॑ घृ॒ते॒न॥ विभ्राजमानस्सरि॑रस्य॒ म॒ध्या॒द्रोचमानो घर्मरुचि॑र्य आ॒गात्। स मृत्युपाशानपनु॑द्य
घो॒रा॒निहायु॒षेणो घृतम॑त्तु दे॒वः॥ ब्रह्म ज्योतिर्ब्रह्मपत्नी॑षु ग॒र्भं॒ यमादधात्पुरुरू॑पं जय॒न्तम्। सु॒वर्ण॒ रम्भग्रहम॑र्कम॒र्च्यं॒ तमायु॒षे वर्धयामो॑ घृ॒ते॒न॥ श्रियं लक्ष्मीमौपलाम॑म्बिकां॒ गां॒ ष॒ष्ठीं च यामिन्द्र सेने॓त्यु॒दा॒हु॒ः। तां वि॒द्यां ब्रह्मयोनिगं॒ सु॒रूपा॒मिहायु॒षे तर्पयामो॑ घृ॒ते॒न॥ दाक्षायण्यस्सर्वयो॒न्य॑स्सु॒यो॒न्य॒स्सहस्रशो विश्वरूपा॑ विरू॒पाः। ससूनवस्सपतय॑स्सयू॒थ्या॒ इहा यु॒षेणो घृतमिदं॑ जु॒ष॒न्ताम्॥ दिव्यागणा बहु॒रूपा॓ः पु॒रा॒णा॒ आयुश्छिदोनः प्रमथ्न॑न्तु वि॒रान्। तेभ्यो जु॒होमि बहु॒धा॑ घृ॒ते॒न॒ मा॒ न॒ः प्र॒जागं॒ रीरिषो मो॑त वी॒रान्॥ ए॒क॒ः पु॒र॒स्ताद्य॒ इदं॑ बभू॒व॒ यतो॑ बभूवु॒र्भु॒वनस्य॑ गो॒पाः। यमभ्येति भु॒वनगं॒ सा॓म्परा॒ये॒ स नो हविर्घृतमिहायु॒षे॓ऽत्तु दे॒वः॥ वसून्रुद्राना॑दि॒त्यान्मरुतो॑ऽथ सा॒ध्या॒नृ॑भून्॒ यक्षा॒न्गन्धर्वाग॒श्च पितृग॒॑श्च वि॒श्वान्। भृगून्थ्सर्पाग॒श्चाङ्गिरसो॑ऽथ स॒र्वा॒न् घृतगं॒ हु॒त्वा स्वायु॒ष्यामिहया॑म श॒श्वत्॥

विष्णो॒ त्वं नो॒ अन्त॑म॒श्शर्म॑ यच्छ सहन्त्य। प्रते॒ धारा॑ मधु॒श्चु॒त॒ उत्सं॑ दु॒ह्रते॒ अक्षि॑तम्॥

आ॒भिर्गी॒र्भिर्यद॑तो न ऊ॒नमाप्या॑यय हरिवो॒ वर्ध॑मानः। य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रा रु॒जासि॑ भू॒यिष्ठ॒ भाजो॒ अध॑ते स्याम। ब्रह्म॒प्रावा॑दिष्म॒तन्नो॒ मा हा॑सीत्॥ ओं शान्ति॒श्शान्ति॒श्शान्तिः॑॥

॥ हरिः॑ ओम्॥

॥ प्रोक्षण मन्त्राः॥

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो᳚र्बा॒हुभ्या᳚म्। पू॒ष्णो हस्ता᳚भ्याम्। अ॒श्विनो॒र्भैष॑ज्येन। तेज॑से ब्रह्मवर्च॒साया॒भिषि॑ञ्चामि॥ दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो᳚र्बा॒हुभ्या᳚म्। पू॒ष्णो हस्ता᳚भ्याम्। सर॑स्वत्यै॒ भैष॑ज्येन। वी॒र्या॑यान्नाद्या॑या॒भिषि॑ञ्चामि॥ दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे। अ॒श्विनो᳚र्बा॒हुभ्या᳚म्। पू॒ष्णो हस्ता᳚भ्याम्। इन्द्र॑स्येन्द्रि॒येण॑। श्रि॒यै यश॑से॒ बला॑या॒भिषि॑ञ्चामि॥

अ॒र्य॒मणं॒ बृह॒स्पति॒मिन्द्रं॒ दाना॑य चोदय। वाचं॒ विष्णु॒ग्ं॒ सर॑स्वतीग्ं सवि॒तारं॑ च वा॒जिन᳚म्। सोम॒ग्ं॒ राजा॑नं॒ वरु॑णम॒ग्निम॒न्वार॑भामहे। आ॒दि॒त्यान्॒ विष्णु॒ग्ं॒ सूर्यं॑ ब्र॒ह्माणं॑ च॒ बृह॒स्पति᳚म्॥ दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳚ऽश्विनो᳚र्बा॒हुभ्यां᳚ पू॒ष्णो हस्ता᳚भ्या॒ग्ं॒ सर॑स्वत्यै वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेस्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चा॒मीन्द्र॑स्य त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चामि॒ बृह॒स्पते᳚स्त्वा॒ साम्रा᳚ज्येना॒भिषि॑ञ्चामि॥

देवास्त्वेन्द्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पान्तु न वा एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति यथ्सञ्चितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः ॥

॥ आशीर्वाद मन्त्राः ॥

अस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः। पुमान्पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः। आशीर्दाया दम्पती वाममश्नुतामरिष्टो रायस्सचतागं समोकसा। य आसिचथ्सन्दुग्दं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः। सर्पिर्ग्रीवी पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य। सहजानिर्यस्सुमखस्यमान इन्द्रायाशिरं सह कुम्भ्यादात्। आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणं सवर्चसम्। संजयन्क्षेत्राणि सहसाहऽमिन्द्र कृण्वानो अन्यां अधरान्थ्सपत्नान्॥

आशिषमेवैतामाशास्ते पूर्णपात्रे। अन्ततोऽनुष्टुभा। चतुष्पद्वा एतच्छन्दः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति। अस्मिन्लोके प्रतितिष्ठानीति। अस्मिन्नेव लोके प्रतितिष्ठति। अथो वाग्वा अनुष्टुक्। वाङ्मिथुनम्। आपोरेतः प्रजननम्। एतस्माद्वै मिथुनाद्विद्योतमानस्स्तनयन्वर्षति। रेतस्सिञ्चन्। प्रजाः प्रजनयन्। यद्वै यज्ञस्य ब्रह्मणा युज्यते। ब्रह्मणा वै तस्य विमोकः। अद्भिश्शान्तिः। विमुक्तं वा एतर् हि योक्त्रं ब्रह्मणा। आदायैनत्पत्नी सहाप उपगृह्णीते

शान्त्यै। अञ्जलौ पूर्णपात्रमानयति। रेतं एवास्यां प्रजां दधाति। प्रजया हि मनुष्यः पूर्णः। मुखं विमृष्टे। अवभृथस्यैव रूपं कृत्वोत्तिष्ठति॥

गोमृगकण्ठेन प्रथमामाहुतिं जुहोति। पशवो वै गोमृगः। रुद्रोऽग्निस्स्विष्टकृत्। रुद्रादेव पशूनन्तर्दधाति। अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः पशूनभिमन्यते। अश्वशफेन द्वितीयामाहुतिं जुहोति। पशवो वा एकशफम्। रुद्रोग्निस्स्विष्टकृत्। रुद्रादेव प्रजा अन्तर्दधाति। अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः पशूनभिमन्यते। अयस्मयेन कमण्डलुना तृतीयाम्। आहुतिं जुहोत्यायास्यो वै प्रजाः। रुद्रोनिस्स्विष्टकृत्। रुद्रादेव प्रजा अन्तर्दधाति। अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः प्रजा अभिमन्यते॥

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम्। इह प्रजामिह रयिग्ं रराणः प्रजायस्व प्रजया पुत्रकाम। अपश्यं त्वा मनसा दीध्यानाण् स्वायां तनूग्ं ऋत्विये नाथमानाम्। उपमामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे॥

सहस्रमाख्यांत्रेददद्याच्छतं परिगरित्र एते चै वासने श्वेतश्चाश्वतरी रथो होतुः पुत्रकामा हाप्याख्यापयेरन् लभन्ते ह पुत्रान् लभन्ते ह पुत्रान्॥

सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदस्सवीराः॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे। भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरति दीर्घमायुः॥

शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति॥

सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च॥ रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः॥

## ॥ आशीर्वाद मन्त्रान्तर सरणिः॥

आयुष्मन्तं वर्चस्वन्तम्। अथो अधिपतिं विशाम्। अस्याः पृथिव्या अध्यक्षम्। इममिन्द्र वृषभं कृणु॥

पूष्णः पोषेण मह्यम्। दीर्घायुत्वाय शतशारदाय। शतग् शरद्भ्य आयुषे वर्चसे। जीवात्वै पुण्याय॥

एतेन वै देवा जैत्वानि जित्वा। यं काममकामयन्त तमाप्नुवन्। यं कामं कामयते। तमेतेनाप्नोति॥

पृथ्वी सुवर्चा युवतिस्सजोषाः। पौर्णमास्युदगाच्छोभमाना। आप्याययन्ती दुरितानि विश्वा। उरुं दुहां यजमानाय यज्ञम्॥

ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदस्सवीराः॥

www.prapatti.com

क्ष॒त्रस्य॒ राजा॒ वरु॑णोऽधिरा॒जः। नक्ष॑त्राणाग्ं श॒तभि॑ष॒ग्वसि॑ष्ठः। तौ दे॒वेभ्य॑ः कृणुतो दी॒र्घमायु॑ः॥

नवो॑नवो भवति॒ जाय॑मा॒नोऽह्ना॓ᳪ॑ के॒तु॒रु॒षसा॑मे॒त्यग्रे॓ᳪ॑। भा॒गं दे॒वेभ्यो॒ विद॑धात्या॒यन् प्रच॒न्द्रमा॓ᳪ॑स्तिरति दी॒र्घमायु॑ः॥

पर्या॓ᳪ॑प्त्या॒ अन॑न्तरायाय॒ सर्व॑स्तोमोऽति रा॒त्र उ॑त्त॒म मह॑र्भवति॒ सर्व॒स्याप्त्यै॒ सर्व॑स्य॒ जित्त्यै॒ सर्व॑मे॒व तेना॓ᳪ॑प्नोति॒ सर्वं॑ जयति॥

श॒तमा॑नं भवति श॒ताय॑ुः पु॒रु॑षश्श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये प्रति॑ तिष्ठति॥

सं त्वा॑ सिञ्चामि॒ यजु॑षा प्र॒जामायु॒र्धनं॑ च॥

रो॒च॒नो रोच॑मानश्शोभ॒नश्शोभ॑मानः क॒ल्याणः॥

सु॒म॒ङ्ग॒लीरि॒यं व॒धूरि॒मा॒ग्ं सं॑मेत॒पश्य॑त। सौभा॓ᳪ॑ग्यम॒स्यै द॒त्वा याथास्तं॒ विपरे॑तन॥

इ॒मां त्वमि॑न्द्रमीढ्वस्सु॒पु॒त्राग्ं॒ सु॒भगा॓ᳪ॑ कृणु। दशा॓ᳪ॑स्यां पु॒त्रानाधे॑हि॒ पति॑मेकाद॒शं कृ॑धि॥ दीर्घमायु॒रस्तु॥

॥ इति उदकशान्तिः समाप्ता॥